**Online at:** https://researchtrendsjournal.com ISSN No: 2584-282X




**INTERNATIONAL JOURNAL OF TRENDS IN EMERGING RESEARCH AND DEVELOPMENT**

**Volume 1; Issue 1; 2023; Page No. 106-110**

**Received: 02-10-2023**
**Accepted: 12-11-2023**

# आधुनिके काले ऐतरेयब्राह्मणस्य प्रासङ्गिकता

**डॉ. काशीनाथ नन्दी**

सहायक–अध्यापकः विभागीयप्रधानश्च, संस्कृतविभागः, कालियाचक कलेज, मालदा, पश्चिमबङ्गः भारत

**DOI:** https://doi.org/10.5281/zenodo.12047371

**Corresponding Author:** डॉ. काशीनाथ नन्दी

**प्रवन्धसारः**

मन्त्रब्राह्मणात्मकवेदस्य मन्त्रव्यतीतापरांशो ब्राह्मणभागः। ब्राह्मणसाहित्येऽस्मिन् वैदिकमन्त्रेषु विधृतं यागयज्ञादीनां व्याख्यासहकृतं विवरणं सविस्तारं विद्यते। 'ब्रह्मण' इति शब्द आद्युदात्तः क्लीवलिङ्गश्च। तस्मादेव ब्राह्मणशब्दस्योत्पत्तिः, एतादृशस्य ब्राह्मणशब्दस्यार्थः - बृहतश्चेतना शक्तिर्वा। इयं शक्तिरेव मन्त्र इति ज्ञायते। ब्रह्मण आधाररूपमन्त्रशक्तेः प्रयोगस्य साधनाक्षेत्रमेव 'ब्राह्मणम्'। अस्यायमर्थः, संहिताभागे उपलभ्यते यद् वृहतश्चेतनायाः सारोऽस्य विषयः। अन्यत्र साधनाया नियमविषयो ज्ञायते ब्राह्मणभागे। पुरोहितानां यज्ञानुष्ठानाय निर्देशिकाकल्पो ब्राह्मणभागः। अत्र यथा निर्देशोऽस्ति तद्नुसारेणैव यज्ञोऽनुष्ठीयते। अतोऽध्यक्षेण सह ब्राह्मणस्य सम्बन्धः स्थापितः। अतो यज्ञस्याध्यक्षस्वरूपमित्युच्यते ब्राह्मणम्। यज्ञे ऋत्विकानामनुशासनं तथोक्तिसमूहमेव ब्राह्मणम्। ऐतरेयब्राह्मणे या आख्यायिका परिलक्षितास्ताभ्य आख्यायिकाभ्यस्तदानीन्तनसामाजिकजीवनस्य तथ्यान्वेषणाय प्रयासः प्रचलितः। सुप्राचीनकाले प्रागैतिहासिकयुगे मानवा विच्छिन्नरूपेण वसवासं कृतवन्तः । अनन्तरं क्रमशः तेऽनुभूतवन्तो दलबद्धरूपेण वसवासस्योपयोगित्वम्। मृगया, कृषिकार्य, शत्रोः आक्रमणादात्मरक्षणमित्यादिकार्ये समानमानसिकता तथा दलबद्धभाव आवश्यक इत्यनुभुतवन्तः । अतः जनाः समाजनिर्माणं कृतवन्तः। वर्तमानकालेऽपि तथैव वसवासं कुर्वन्ति। ऐतरेयन्ब्राह्मणे एतस्य प्रमाणमपि विद्यते।

ऐतरेयब्राह्मणे तनुनप्त्र विषयकमाख्यानमेकं विद्यते यत्रोक्तं पुरा देवानां परस्परं विरुद्धभावं पश्यन्तः ते देवा भीता आसन्। असुराक्रमणाद् भीताः ते पुत्रान् रक्षणाय तान् पुत्रान् वरुणस्य गृहे स्थापितवन्तः । अनन्तरं तैर्देवैः परस्परं बन्धुत्वभावस्य शपथग्रहणं कृतम्। एतस्य शपथग्रहणस्य नाम एव तनुनप्त्र। चतुर्थाध्यायस्य सप्तमे खण्डे उक्तादेतस्मादाख्यानादनुमीयते यत् परस्परं विरुद्धभावः विद्यते चेत् शत्रूनामाक्रमणस्य सम्भावना वर्धते। अतः तदानीन्तनसमाजेऽपि शत्रूनामाक्रमणादात्मरक्षणाय समाजस्य जनैः समानमानसिकतासम्पादनाय तथा समवेतवसवासाय प्रतिज्ञाग्रहणं कृतम्। ऋग्वेदस्य सांमनस्यसूक्ते एतादृशी प्रार्थनोपलभ्यते।

**Keywords:** मन्त्रब्राह्मणयोर्वेदनामधेयम्"। आपस्तम्बयज्ञपरिभाषासूत्रम्- १.३१, ऐ.ब्रा.- ४.७, समानी व आकूतिः समाना हृदयानि वः, समानमस्तु वो मनो यथा वः सुसहासति ।। (ऋ.सं. १०.१९१.४)

## Introduction

भारतीयसंस्कृतिसम्बन्धिन इतिहाससम्पदः प्रारम्भो वैदिकयुगादेव। अतो भारतवर्षस्य सार्विकज्ञानलाभाय वेदस्य तथा वैदिकसाहित्यस्य ज्ञानमावश्यकम्, यद्विश्वसाहित्यस्य प्राचीनतमं तथात्युत्कृष्टमिति प्रसिद्धिरस्ति।

मन्त्रब्राह्मणात्मकवेदस्य [1] मन्त्रव्यतीतापरांशो ब्राह्मणभागः। ब्राह्मणसाहित्येऽस्मिन् वैदिकमन्त्रेषु विधृतं यागयज्ञादीनां व्याख्यासहकृतं विवरणं सविस्तारं विद्यते। 'ब्रह्मण' इति

[1] "मन्त्रब्राह्मणयोर्वेदनामधेयम्"। आपस्तम्बयज्ञपरिभाषासूत्रम्- १.३१।

शब्द आद्युदात्तः क्लीवलिङ्गश्च। तस्मादेव ब्राह्मणशब्दस्योत्पत्तिः, एतादृशस्य ब्राह्मणशब्दस्यार्थः - बृहतश्चेतना शक्तिर्वा। इयं शक्तिरेव मन्त्र इति ज्ञायते । ब्रह्मण आधाररूपमन्त्रशक्तेः प्रयोगस्य साधनाक्षेत्रमेव 'ब्राह्मणम्'। अस्यायमर्थः, संहिताभागे उपलभ्यते यद् वृहतश्चेतनायाः सारोऽस्य विषयः। अन्यत्र साधनाया नियमविषयो ज्ञायते ब्राह्मणभागे। पुरोहितानां यज्ञानुष्ठानाय निर्देशिकाकल्पो ब्राह्मणभागः। अत्र यथा निर्देशोऽस्ति तदनुसारेणैव यज्ञोऽनुष्ठीयते। अतोऽध्यक्षेण सह ब्राह्मणस्य सम्बन्धः स्थापितः। अतो यज्ञस्याध्यक्षस्वरूपमित्युच्यते ब्राह्मणम्। यज्ञे ऋत्विकानामनुशासनं तथोक्तिसमूहमेव ब्राह्मणम्। आपस्तम्बयज्ञपरिभाषायां ब्राह्मणलक्षणमुक्तं यत् - यागयज्ञादि- क्रियाकलापादेः सूक्ष्मातिसूक्ष्मनिर्देशस्तथा चोदना यत्रोपलभ्यते तदेव ब्राह्मणम् [2] । शतपथब्राह्मणे 'ब्राह्मणम्' इति पदस्य निर्वचनमुपलभ्यते। तत्र 'ब्राह्मणम्' इति पदस्यार्थो वेदो वेदमन्त्रो वा।

बेदेन सह संयोगवशाद्राह्मणं नामैतस्य। 'ब्रह्म***णः***' तथा 'ब्राह्मण' शब्दः समार्थकः [3] । महाभाष्यकारेण पतञ्जलिनाप्येवमेवोच्यते [4] ।

साधारणत उपलभ्यते यद् ***यज्ञ*** एव क्रिया। एषा क्रिया भावं प्रकाशयति बहिर्द्रव्याहुतिमाध्यमेन। ज्ञानेनान्तरस्य भावेन वा यज्ञानुष्ठानं सम्पद्यते। अस्य सूचना ब्राह्मण***साहित्ये*** उपलभ्यते। प्रत्येको यज्ञः फलेन सह ***संयु***क्तः। इष्टलाभाय फलकामनायै वा यद्यज्ञानुष्ठानं तस्य फल-प्रशंसा प्रमाणञ्च समग्रे वैदिकसाहित्ये एव समुपलभ्यते।

ब्राह्मणमितिपदेन विस्तृतं गद्यसाहित्यमेव बोधयति, यस्मिन्नेव वर्तन्ते मन्त्रस्य विविधव्याख्या, यज्ञीय कर्मणो विवरणं, मन्त्रस्य विनियोगः, यज्ञफलं, शब्दस्य व्युत्पत्तिस्तथा छन्दोविषयकानि बहुविधालोचनानि । मार्टिन् हग् प्रमुखानां पाश्चात्यवेदतात्विकानां मतानुसारं 'ब्राह्मण' इति शब्दस्यार्थ ब्रह्मा तथा यज्ञपरिचालको ऋत्विक्। ब्राह्मणसाहित्यस्य लक्षणनिरूपणे भारतीयैः प्राचीनाचार्यैवहुविधा व्याख्याः प्रदीयन्ते। पूर्वमीमांसादर्शनस्य जनकेनाचार्यजैमिनिनोक्तं 'शेषे ब्राह्मणशब्दः' [5] । अस्य व्याख्याप्रसङ्गे पुनरप्युक्तं यत्- "अथ किं लक्षणं ब्राह्मणम्? मन्त्राश्च ब्राह्मणञ्च वेदः। तत्र मन्त्रलक्षणे उक्ते परिशेषसिद्धत्वाद***ब्रा***ह्मणलक्षणं वचनीयम्। मन्त्रलक्षणवचनेनैव सिद्धम्। यस्यैतल्लक्षणं ***न भवति,*** तद्ब्रह्मणमिति परिशेषसिद्धं ब्राह्मणम्" अस्यार्थः- मन्त्रव्यतीतावशिष्टांशं ब्राह्मणम्। ऐतरेयब्राह्मणस्य भाष्यभूमिकायामाचार्यसायणेनोक्तम्-

"मन्त्रश्च ब्राह्मणञ्चेति द्वौ भागौ तेन मन्त्रतः।
अन्यद्ब्राह्मणमित्येतद्भवेद्ब्राह्मणलक्षणम्"।।

ब्राह्मणसाहित्ये यागादिविषया एव प्राधान्येन सविस्तारं वर्ण्यन्ते। एतादृशस्य यागादिविषयस्य गौरवग्रहणाय ब्राह्मणस्य कथांशस्य तथाख्यानांशस्य प्राधान्यमनस्वीकार्यम्। एतादृशस्याख्यानस्य प्राधान्यं ब्राह्मणयुगे जनप्रियमासीदिति मन्यते। आख्यानेन कथांशेन वा यज्ञानुष्ठानक्रमवर्णनावसरे वैदिकभारतवर्षस्य भौगोलिकपटभुमिः, वर्णव्यवस्था, विविधवर्णानां परिचयः, ब्राह्मण-क्षत्रिययोः प्रतियोगिता, वर्णानुसारं जीविकावृत्तिः, शिक्षा, छात्रजीवनं, विवाहसंस्कारः, स्त्रीशिक्षाधिकारश्च, कृषि-वाणिज्य-पशुपालनम्, अर्थनैतिकावस्था, खाद्यं, पानीयं, वस्त्रं, नृत्यादिललितकला, युद्धविद्या, राज्याभिषेकविधिः, राजन्यवर्गस्य बहुविधत्वं, प्राचीनपञ्जिका, रोगस्तथा तस्य प्रतिकारोपायाः, प्राणी-उद्भि***द्जी***वाः, स्थापत्यविद्या, पारिवारिकगठनं सम्पर्को वा, वसतिनिर्मानं वा, अतिथ्याप्यायनं, विविधधातुनां व्यवहारः प्रभृतयः सामाजिकैतिहासिकविषया ब्राह्मणसाहित्ये उपलभ्यन्ते। A History of Indian Literature इति ग्रन्थे [6] उइन्टारनिज्-महोदयेनोक्तम्- 'of the Brahmanas, the second great class of works belonging to the Veda...^ prime अत्रैव म्याक्समूलरमहोदयानां मतमपि प्रदत्तम्।

मानवानामुन्नतिर्यावद् वर्धते तावत्तेषामाकाङ्क्षापि । अतो मानवानां चिन्ताधारा सर्वदा परिवर्तनशीला। मानवाः समाजमत्याधुनिकपद्धत्या आत्मेच्छानुरूपं निर्माणं कुर्वन्ति, इदानीं यस्य प्रयोजनमधिकं तत् स्वीकुर्वन्ति गुरुत्वेन। अनन्तरं तत् प्राचीनमित्यनुमीयते। अतस्तत् परित्यज्यमिति। पुनराविष्कुर्वन्ति नवनिर्माणं, येनाधिकतरामुन्नतिं साधयन्ति। एतादृशेन नित्यनूतनाविष्कारेण पूरातनपरित्यागेन मानवानां चिन्ताधारापि परिवर्तनपथमुपगता। मानवानां साहित्यकृतौ प्रतिफलितं तेषां चिन्तनपारम्पर्यमाकाङ्क्षांयाः परिवर्तनशीलत्वं ग्रहणवर्जनमाधारीकृत्य यद्विरचितम्। स्थानानुरूपमाकाङ्गा तथा चिन्तनं भिन्नं भवेत्। पुनश्च समयानुरूपमपि भिन्नता वर्तते। एतादृशस्य परिवर्तनस्य प्रतिफलनं विद्यते साहित्येऽपि। मानवेषु कोऽपि सुचिरकालं जीवितुं न शक्नोति । अतः कालान्तरं समाजस्य परिचयवहनेऽसमर्था मानवाः।

---

[2] "कर्मचोदना ब्राह्मणानि"। आप.य.प.सूत्रम्-१.३२

[3] "ब्रह्म वै ब्राह्मणः"। शतपथब्राह्मणम्- १३.१.५.३।

[4] "समानार्थावेतौ ब्रह्मणशब्दो ब्राह्मणशब्दश्च"। महाभाष्यम्।

[5] 'जैमिनि-सूत्रवृत्तिः', २.१.३१।

[6] H.I.L. P- 163

अतस्तेषां बौद्धिकस्तरे निलीनं यत् साहित्यं तन्मानवानां बहुविधकर्मकाण्डाणां युगान्तरव्यापि साक्ष्यस्वरूपम्। अतः साहित्यादेवोन्मोचयति युगपरम्परया पूर्वतनमानवानां समाजजीवनालेखनवैचित्र्यम्।
ब्राह्मणसाहित्येऽप्याख्यानमाध्यमेन यागयज्ञस्य दृढीकरणावसरे तदानीन्तनसमाजजीवनं निहितमित्यनुमीयते। ऋग्वेदीयब्राह्मणयोः या आख्यायिका परिलक्षितास्ताभ्य आख्यायिकाभ्यस्तदानीन्तनसामाजिकजीवनस्य तथ्यान्वेषणाय प्रयासः प्रचलितः।

## आख्यानमाध्यमेन प्रतिफलितमैतरेयब्राह्मणस्य सामाजिकचित्रम्

### दिग्विषयकमाख्यानम् (२.१)

दिङ्गिरूपणस्यावश्यकत्वं मानवजीवनेऽपरिहार्यमिति नास्ति सन्देहावसरः। गमनागमनकार्यस्य यथायोग्यमार्गनिर्णयाय शुभकार्यारम्भाय तथा वसतिनिर्माणाय सर्वत्रैव दि*ग्*निर्णय आवश्यकः। ऐतरेयब्राह्मणसमाजेऽपि तथैवासीदित्यनुमीयते। ऐतरेयब्राह्मणस्य *दिव*तीयाध्याये प्रायणीय-उदयनीयेष्टिसम्बन्धितमाख्यानमेकं दृष्टम्। तत्रोक्तं यत् - पुरैकदा यज्ञो देवसमीपादन्यत्र गतवान्। तदा देवा अदित्या यज्ञं प्राप्तवन्तः। अदित्या वरं प्रार्थितम्। तयोक्तं यत् तयादित्यैव यज्ञस्य प्रारम्भस्तथा समापनं भवेत्। अतः मत् उदयनं- 'मदुदयन', मत् प्रायणं- 'मत् प्रायण' इति शब्दद्वयादेव उदयनीयेष्टियागः प्रायणीयेष्टियागश्च। आख्यानस्य एतस्मादंशादनुमीयते यत् सूर्योदयात् सूर्यास्तकालपर्यन्तमेव यागसमयः। अर्थादु यागक्रिया पृथिव्याः गत्या सह सम्पर्किता। अन्धकारे तथा सूर्यलोकव्यतीतस्थाने यागानुष्ठानमनुचितमासीदिति ज्ञायते। साधारणतो दृश्यते यत् सर्वेषां सर्वदा यागस्याधिकारो न विद्यते। एतेनाख्यानेन ज्ञायते यन्न केवलं मनुष्याणां, देवानामप्येकदा यागानुष्ठानेऽधिकारो नासीदिति।

अदित्या द्वितीये वरयुक्तं यदादित्या पूर्वदिशः, अग्निना दक्षिणदिशः, सोमेन पश्चिमादिशस्तथा सवित्रा उत्तरदिशः ज्ञानं भवेदिति । एतस्माज्ज्ञायते यत् प्रतिदिशां विशेषत्वमेकं विद्यते। तेनैव विशेषत्वेन दिङ्गिर्णये तथा मार्गान्वेषणे सौविध्यं भवेदिति ।

न केवलमेतत्, एतेनाख्यानेन एतदपि ज्ञायते यत् तदानीन्तनीये समाजेऽपि स्थानभेदेन कृषिकर्मणः समयभेदः, नद्याः गतिप्रवाहः, वायुप्रवाहादि भौगोलिकीधारणा स्पष्टरूपेण विद्यमाना आसन्। दक्षिणदिगग्निना सह सम्पर्किता पुनश्चोषधीसमूहा अग्न्याधीना एव। अत उक्तं यद् दक्षिणदिशि एवौषधीनां पक्क्कत्वं पूर्व भवेत्। वास्तविकरूपेण एवं ज्ञातं यद् देशस्य दक्षिणांशस्य शस्यसमूहस्य पूर्वं पक्क्कत्वं भवति। पुनश्च सोमेन सह जलस्य सम्बन्धो विद्यते। सोमः पश्चिमादिक्स्थः देवः। जलस्य देवोऽपि सोमः, अतः जलस्य गमनमपि पश्चिमाभिमुखम्। वास्तविकीरूपेण भारतवर्षस्य पश्चिमोपकुलस्य नद्यः पश्चिमाभिमुखमेव प्रवहन्ति। एतस्माज्ज्ञायते यदेतादृशी धारणा तदानीन्तनसमाजेऽपि स्पष्टं प्रचलितासीत्। सविता प्रेरकदेवरूपेण कल्पितः। तस्य प्रेरणयैव वायुः प्रवाहितो भवेदिति। सविता उत्तरदिक्स्थो देवः। अत उत्तरपश्चिमाभिमुखं सर्वाधिकवायुप्रवाहोऽनुमीयते। एतादृशानां तथ्यानां ज्ञानमृग्वेदीयसमाजेऽपि स्पष्टरूपेणासीदित्यनुमीयते। विशेषतः नदीप्रवाहाद् वायुप्रवाहाद् वैवमनुमीयते यदैतरेयब्राह्मणस्य समाजः प्रधानतो भारतवर्षस्य पश्चिमोपकुले विद्यमान आसीदिति। अतः एतदाख्यानमैतरेयब्राह्मणस्य रचनास्थानपरिचायकरूपेणापि परिगण्यते।

### दलनेतुः प्रयोजनीयता (३.३)

सत्य-त्रेता-द्वापर-कलि वेति न जाने ऐतरेयब्राह्मणस्य युगम्। वाक्यमेकं प्रचलितमस्ति यत् "सङ्घशक्तिः कलौ युगे"। अर्थात् कलियुगे सङ्घशक्तिस्तथा सामूहिकशक्तिरेव प्रधानम्। अतो दलबद्धरूपेण कार्यकरणमेव कार्यसाधनस्य मूलमन्त्रम् । किन्तु सामूहिककार्ये एको दलनेतावश्यकः। दलनेतारं विहाय लक्ष्यपूरणं न भवेदिति निर्दिष्टम्।
यज्ञस्थानं प्रत्यानी*यस्य* सोमस्य शकटादवतरणविषययैतरेयब्राह्मणस्य तृतीयाध्याये दृष्टमाख्यानमेकम्। अत्रोक्तं यद्देवा बहुवारं युद्धे पराजिता अभवन्। अवशेषं तैः पूर्वोत्तरदिशि युद्धं प्रारब्धं, तेनैव जयं प्राप्तवन्तः। अतः सोमं यदि पूर्वोत्तरकोणे तथेशानकोणेऽवतारयति तर्हि यज्ञका*र्यं* पूर्णरूपेण सम्पन्नं भवेदिति। एतस्मादाख्यानाज्ज्ञायते यदीशानकोणः शुभसूचकः*।* अतो वर्तमानसमाजसदृशमैतरेयब्राह्मणसमाजेऽपीशानकोणे एव शुभकार्यस्य प्रारम्भोऽभवत्। अतो निर्विघ्नेन कार्यसमापनमासीदिति*।*
आख्यानस्यान्तिमांशे उक्तं यदु देवा सर्वत्र पराजिता आसन्। तस्य कारणमेवं यत् तेषां नेता तथा राजा नासीदिति। कथञ्चिदीशानकोणे यदा जयं लब्धवन्तस्तदा सोमं राजरूपेण तथा दलनेतृरूपेणाभिषिक्तवन्तः। तस्मात् परमेव ते देवाः सर्व दिशः जितवन्तः। राजहीनरूपेण युद्धे पराजयोऽवश्यम्भावी तथा नेतृहीनैः कार्यसमापनं न भवेदिति ज्ञानं तदानीन्तनसमाजेऽपि प्रचलितमासीदित्येतस्मादनुमीयते।

**हिंसा चिकित्सा च (४.१)**

वर्तमानसमाजे जनानां मनसि हिंसाया व्यापकता क्रमशो वर्धते। प्रतिनियतं हिंसायाः प्रमाणमुपलभ्यते। वैदेशिकाक्रमणमपि हिंसाभावादेव जायते। न केवलं वैदेशिकहिंसाभावः, समग्रदेशे तथा स्वगृहेऽप्येतस्य प्रभावोपलभ्यते। न केवलं मनुष्येसु, देवेष्वपि हिंसाभावो विद्यमान आसीत्।

ऐतरेयब्राह्मणस्य चतुर्थाध्याये प्रवर्गकर्मविषयकमाख्यानमेकं विद्यते । तत्रोक्तं यत् पुरा देवा यज्ञमन्नरूपेणेष्टवन्तः। यज्ञस्तदा देवैः हिंसितः सन् ततोऽन्यत्र गतः। हिंसितश्चेदपि यदा स यज्ञो देवानामन्नरूपं नाभवत् तदा देवैः पुनः यज्ञस्यायोजनं कृतम्। दैवचिकित्सकेनाश्विद्वयेनापि हिंसितस्य पीडितस्य चिकित्साऽपि ते कारितवन्तः। एतस्मादाख्यानाद् वयं ज्ञातवन्तो यद् ब्राह्मणयुगेऽपि हिंसाभावः प्रचलित आसीदिति। पुनश्च हिंसितः सन् यदा स्वस्थाने दृढ आसीत् तदा हिंसाभावं ***त्यक्त्वा*** सख्यभावस्योदयो जातः। अतः चिकित्सकेन निपीडितस्य सेवापि कारिता। ब्राह्मणयुगेऽपि चिकित्सापद्धतिः प्रचलिता आसीदित्येतस्य निदर्शनमत्रोपलभ्यते । ऐतरेयब्राह्मणस्य १५.१ अंशे यदाख्यानं विद्यते तत्राप्यन्नस्वरूपस्य यज्ञस्य विषयो वर्णितः।

**ऋतुमासादिकालविषयकमाख्यानम् (४.६)**

मानवानां प्रात्यहिकजीवने कालगणनम् विशिष्टविषयरूपेण परिगणितम्। कालनिर्णयेनैव प्रतिदिनस्य प्रारम्भं तथा समापनं भवेदिति। किमपि कार्यस्य प्रारम्भनिमित्तं कालनिर्णयं प्राथमिकप्रक्रियारूपेण परिगणितम्। वसतिनिर्माणं संस्कारादि सर्वमेव ज्योतिषशास्त्राद्यधीनमस्ति। कालार्थे वत्सरम्, ऋतुः प्रभृतयः शब्दाः परिगणिताः। न केवलं वर्तमानसमाजे ब्राह्मणसमाजेऽप्येतादृशं ज्ञानमासीदिति ज्ञायते।

ऐतरेयब्राह्मणस्य चतुर्थाध्याये उपसदिष्टिविधानप्रसङ्गे यदाख्यानं विद्यते तत्र दृश्यते यत् पुरासुरैरेकदा लोकत्रयमधिकृतम्।

देवैस्तदधिकारनिमित्तमुपसदिष्टियागानुष्ठानं प्रारब्धम् । अतोऽसुराः ततः विताडिताः सन्तोऽन्यत्राश्रयं गृहीतवन्तः। तेऽसुरा उपसदिष्टित्रयेण त्रिलोकाद् विताडिताः। ते क्रमशः ऋतु-मास-पक्षाहरात्रेष्वाश्रयं नीतवन्तः। देवा अप्युपसदिष्टियागेन तेभ्यः स्थानेभ्योऽसुरान् विताडितवन्तः। अन्तिमं ते सन्ध्यायामाश्रयं गृहीतवन्तः।

एतस्माज्ज्ञायते यत् तदानीन्तनसमाजेऽपि ऋतुमासादिविषये स्पष्टधारणासीदिति। पुनश्च दिवा नक्तमित्यनयोर्मध्ये सन्ध्याकालोऽशुभः, एतज्ज्ञानमप्याख्यानाज्ज्ञायते। पुनश्चोनविंशाध्याये द्वादशाहविषयकमाख्यानमेकं [7] विद्यते। तस्माज्ज्ञायते यद् मासद्वयं मिलित्वा एकः ऋतुः। तथैव षड्ऋतूनां विषय उक्तः।

**दलबद्धरूपेण वसवासः (४.७)**

सुप्राचीनकाले प्रागैतिहासिकयुगे मानवा विच्छिन्नरूपेण वसवासं कृतवन्तः । अनन्तरं क्रमशः तेऽनुभूतवन्तो दलबद्धरूपेण वसवासस्योपयोगित्वम्। मृगया, कृषिकार्य, शत्रोः आक्रमणादात्मरक्षणमित्यादिकार्ये समानमानसिकता तथा दलबद्धभाव आवश्यक इत्यनुभुतवन्तः । अतः जनाः समाजनिर्माणं कृतवन्तः। वर्तमानकालेऽपि तथैव वसवासं कुर्वन्ति। ऐतरेयन्ब्राह्मणे एतस्य प्रमाणमपि विद्यते।

ऐतरेयब्राह्मणे तनुन***प्त्र*** विषयकमाख्यानमेकं [8] विद्यते यत्रोक्तं पुरा देवानां परस्परं विरुद्धभावं पश्यन्तः ते देवा भीता आसन्। असुराक्रमणा***द्*** भीताः ते पुत्रान् रक्षणाय तान् पुत्रान् वरुणस्य गृहे स्थापितवन्तः । अनन्तरं तैर्देवैः परस्परं बन्धुत्वभावस्य शपथग्रहणं कृतम्। एतस्य शपथग्रहणस्य नाम एव तनुन***प्त्रा*** चतुर्थाध्यायस्य सप्तमे खण्डे उक्तादेतस्मादाख्यानादनुमीयते यत् परस्परं विरुद्धभावः विद्यते चेत् शत्रूनामाक्रमणस्य सम्भावना वर्धते। अतः तदानीन्तनसमाजेऽपि शत्रूनामाक्रमणादात्मरक्षणाय समाजस्य जनैः समानमानसिकतासम्पादनाय तथा समवेतवसवासाय प्रतिज्ञाग्रहणं कृतम्। ऋग्वेदस्य सांमनस्यसूक्ते एतादृशी प्रार्थनोपलभ्यते [9]।

**स्त्रीकामुको गन्धर्वः (५.१)**

नारीनिर्यातनं वर्तमानसमाजे एका महती समस्या विद्यते। एतस्य प्रकोपः प्रतिदिनं क्रमशः वर्धते। पुरुषाणां कामुकभावादेवैतादृशं निर्यातनम्। न केवलं युवत्यः, बाला अपि एतस्मान्निर्यातनान्न त्रायन्ते। ऐतरेयब्राह्मणसय समाजेऽपि स्त्रीकामुकानां परिचयो विद्यते।

ऐतरेयब्राह्मणस्य पञ्चमेऽध्याये सोमक्रयविषयकमाख्यानमेकमुपलभ्यते। तत्रोक्तं यत् सोम एकदा गन्धर्वसमीपमासीत्। तं सोममानयननिमित्तं देवा ऋषयश्च चिन्तिता आसन्। तदा देव्या वाचोक्तं यत्, गन्धर्वाः स्त्रीकामुकाः। अतः स्त्रीविनिमयेन सोमं त्यक्तुं शक्नुवन्ति । अतः बालिकारूपं देवीवाचं मूल्यस्वरूपं प्रदाय

---

7 ऐतरेयब्राह्मणम्- १९.४

8 ऐ.ब्रा.- ४.७

9 समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति ।। (ऋ.सं. १०.१९१.४)

गन्धर्वसमीपात् सोमस्य क्रयणं कृतवन्तः । एतस्मादाख्यानादेव स्त्रीकामुकानां गन्धर्वानां परिचयो लभ्यते। पुनश्च एवमनुमीयते यद् बालिकाः पुरुषैः सह मेलने अयोग्या आसन्निति । एतस्मात् कारणादेव देवी वाक् बालिकारूपेणैव गन्धर्वसमीपं गतवती।

### निर्वाचित-सहायक-ग्रन्थपञ्जी


1. Adhikari TN. Gopatha Brāhmaṇa, a critical study: An analysis of the topics and a comprehensive critique of the BRĀHMAṆA text of the Atharva-veda. Calcutta: Sanskrit Pustak Bhandar; c1994.
2. Brahmaṇa A. (Sanskrit), ed. Sudhakar Malaviya, Vol. I & II, Varanasi: Tara Printing Works; c1980.
3. Apte VS. The Students Sanskrit-English Dictionary, 1890, rpt., Delhi: MLBD; c1993.
4. Sūtra AD. ed. Amar Kumar Chattopadhyay, Kolkata: The Aisatic Society; c2002.
5. Basu J. India of the age of the Brahmanas. Calcutta: Sanskrit Pustak Bhandar; c1966.
6. Sūtra KS, ed. N. Gopala Sastri, Varanasi: Chowkhamba Sanskrit Series; c1991.
7. Rgveda Brahmnaṇas, trans. A. B. Keith. HOS London: 1920, rpt., Delhi: MLBD; c1971.
8. Winternitz M. A History of Indian Literature, Vol. i, tr. S. Ketkar, 3rd ed. Calcutta University; c1962.
9. आश्वलायनगृह्यसूत्र, सम्पा. नरेन्द्रनाथ शर्मा. दिल्ली: इस्टार्ण वुक लिङ्कार्स; १९८६ ।
10. ऋग्वेदादि-भाष्य-भूमिका, दयानन्दसरस्वती, सम्पा. युधिष्ठिरमीमांसकः. अमृतसरः श्री हरलाल कपुर ट्राष्ट; १९७४ ।
11. कारठेकर, प्र. वैदिक आख्यान. नतुन दिल्लीः राष्ट्रीय संस्कृत संस्थानम्; १९९५ ।
12. जैमिनिसूत्रवृत्तिः श्रीयुतरामेश्वरसूरिविरचिता. दिल्लीः चौखम्वा-संस्कृतप्रतिष्ठानम्; १९९२ ।
13. त्रिवेदी, रा. यज्ञकथा. कलिकाताः पुस्तकमेला; १४०२।
14. त्रिवेदी, रा. रामेन्द्रसुन्दर रचनावली (ऐतरेयब्राह्मण).



**Creative Commons (CC) License**

This article is an open access article distributed under the terms and conditions of the Creative Commons Attribution (CC BY 4.0) license. This license permits unrestricted use, distribution, and reproduction in any medium, provided the original author and source are credited.